दमितः। इत्यमरः। २।७।४३॥ (यथा, महाभारते। १।२२२।४६।
"तथैवाश्वतरीणाञ्च दान्तानां वातरंहसाम्॥"
दन्तेन निर्वृत्तम्। दन्त+"तेन निर्वृत्तम्।" ४।२।६८। इति अण्। दन्तनिर्म्मितम्। यथा, महाभारते। ५।४६।५।
"तपनीयैरासनैस्तीर्णां काञ्चनैर्दारवैरपि।
अश्मसारमयैर्दान्तैः स्वास्तीर्णैःसोत्तरच्छदैः॥")
दाता। इति संक्षिप्तसारे उणादिवृत्तिः॥
पुं, दमनकवृक्षः। शिखितरुः। इति राजनिर्घण्टः॥ (विदर्भराजपुत्त्रविशेषः। यथा, महाभारते। ३।५३।८—९।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम्॥"
स्त्री, अप्सरोविशेषः। यथा, महाभारते। १३।१९।४५।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च॥")

दान्तिः, स्त्री, (दम+क्तिन्।"अनुनासिकस्येति।" ६।४।१५। इति दीर्घः।) तपःक्लेशसहिष्णुता। तत्पर्य्यायः। दमथुः २ दमः ३। इत्यमरः। ३।२।३॥

दापितः, त्रि, (दाप्यते स्म इति। दा+णिच्+कर्म्मणि क्तः।) साधितः। इत्यमरः।३।१।४०॥ धनादिना व्यायत्तीकृतः। इति भरतः॥ धुतौ इति ख्यातं वस्त्रे दत्तं स इति रमानाथः॥ दण्डितः। इति विद्याविनोदः॥ शोधितद्रव्यम्। इति नयनानन्दः॥ दायित इति पाठोऽपि। इति कालिङ्गपुरुषोत्तमौ॥

दाम, [न्] स्त्री क्ली, (दीयते इति। दा दाने दो अवखण्डने वा+"सर्व्वधातुभ्यो मनिन्।" उणां। ४।१४५। इति मनिन्।) यत्रैकस्मिन् बहुप्रग्रहयुक्ते अनेकगावो बध्यन्ते तत्। दाउनि इति दौँका इति च भाषा। तत्पर्य्यायः। सन्दानम् २। इत्यमरः। २।९।७३॥ रज्जुः। इति दामोदरदर्शनात्॥ (यथा, भागवते। १।८।३१।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम्।
वक्त्रं निनीय भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति॥"
माला। यथा, माघे। ४।५०।
"दधतमलघुविलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानमुष्य॥"
दातरि, त्रि। यथा, ऋग्वेदे। ६।४४।२।
"यः शग्मस्तुविशग्म ते रायो दामा मतीनाम्॥"
"रायो धनस्य दामा दाता भवति।" इति तद्भाष्ये सायनः॥)

दामनपर्व्व, [न्] क्ली, (दमनो दमनवृक्षस्तस्येदमित्यण्प्रत्यये दामनं तद्भञ्जनसम्बन्धि पर्व्व यस्मिन्।) दमनभञ्जनतिथिः। सा चैत्रशुक्लचतुर्द्दशी। इति तिथ्यादितत्त्वम्॥

दामनी, स्त्री, (दामैव। दामन्+स्वार्थे प्रज्ञादित्वात् अण्। "अन्।" ६।४।१६७। इति प्रकृतिभावः। "टिड्ढेति।" ४।१।१५। इति ङीप्।) पशुबन्धनरज्जुः। तत्पर्य्यायः। पशुरज्जुः २। इत्यमरः। २।९।७३॥ (यथा, हरिवंशे। ६५।२४।
"कीलैरारोप्यमाणैश्च दामनीपाशपाशितैः॥")

दामलिप्तं, क्ली, तमोलिप्तदेशः। इति हेमचन्द्रः। ४।४५॥

दामा, स्त्री, (दामन्+"डाबुभाभ्यामन्यतरस्याम्।" ४।१।१३। इति पक्षे डाप्।) दाम। इति भरतः॥

दामाञ्चनं, क्ली, (दामाञ्चलम्। पृषोदरादित्वात् लस्य नः।) अश्वादेः पादबन्धनरज्जुः। इति हेमचन्द्रः। ४।३१७॥

दामाञ्चलं, क्ली, (दाम्नः अञ्चलमिव।) एकशफाङ्घ्रि बन्धः। अश्वादिपादबन्धनरज्जुः। इति हारावली। ६१॥ (यथा, माघे। ५।६१।
"सस्नुः सरोषपरिचारकवार्य्यमाणा
दामाञ्चलस्खलितलोलपदं तुरङ्गाः॥")

दामोदरः, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा मतिर्या तया गम्यते इति दामोदरः। 'दाम्नादामोदरं विदुः।' इति भगवद्वचनात्। यशोदया दाम्नोदरे बद्ध इति वा दामोदरः।
'दामानि लोकनामानि तानि यस्योदरान्तरे।
तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः॥'
इति वा।" इति विष्णुसहस्रनामभाष्ये शङ्करः॥ ५३॥ तथा, महाभारते। ५।७०।८।
"देवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः॥")
विष्णुः। इत्यमरः। १।१।१८॥ (दाम रज्जुरुदरे यस्य। श्रीकृष्णः। यथा, महाभारते। १।१९०।१९।
"दामोदरो भ्रातरमुग्रवीर्य्यं
हलायुधं वाक्यमिदं बभाषे॥"
यशोदयासौ उदरदेशे दाम्ना बद्ध आसीत् अतोऽस्य तथा नाम। यथा, हरिवंशे।६३।१४,२६।
"दाम्ना चैवोदरे बद्ध्वा प्रत्यबन्धदुदूखले।
यदि शक्तोऽसि गच्छेति तमुक्त्वा कर्म्म साकरोत्॥"
"स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात्।
गोष्ठे दामोदर इति गोपीभिः परिगीयते॥")
भूतार्हद्विशेषः। इति हेमचन्द्रः।२।१३०॥ (शालग्राममूर्त्तिविशेषः। तल्लक्षणं यथा, पद्मपुराणे।
"स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो भवेत्तु सः।
चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा॥"
अस्य अन्यद्विवरणन्तु शालग्रामशब्दे द्रष्टव्यम्॥*॥ काश्मीरस्य नृपविशेषः। यथा, राजतरङ्गिण्याम्। १।६४।
"गतिं प्रवीरसुलभां तस्मिन् सुचरिते गते।
श्रीमान् दामोदरो नाम तत्सूनुरभ्यत क्षितिम्॥")

दाम्भिकः, पुं स्त्री, (दम्भेन चरतीति। दम्भ+"चरति।" ४।४।८। इति ठक्।) वकपक्षी। इति राजनिर्घण्टः॥ दम्भयुक्ते, त्रि॥ (यथा, मनुः। ३।१५९।
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी॥")

दाय, ऋ ङ दाने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ऋ, अददायत्। ङ, दायते। इति दुर्गादासः॥

दायः, पुं, (दीयते इति। दा दाने+घञ्।"आतो युक् चिण्कृतोः।" ७।३।३३। इति युक्।) यौतुकादिदेयधनम्। (यथा, महाभारते।२।५१।१।
"दायन्तु विविधं तस्मै शृणु मे गदतोऽनघ!।
यज्ञार्थं राजभिर्दत्तं महान्तं धनसञ्चयम्॥")
कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत्। इति भरतः॥ तत्पर्य्यायः। हरणम् २। इत्यमरः। २।८।२८॥ सोढुकभागधनम्। विभक्तव्यपितृद्रव्यम्। (यथा, मनुः। ९।१६४।
"औरसो विभजन् दायं पित्र्यं पञ्चममेव वा॥"
विभागार्हधनमात्रम्। यथा, तत्रैव। ९।७७।
"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः।
ऊर्द्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत्॥"
दा दाने+भावे घञ्।) दानम्। इति मेदिनी। ये, ३०॥ (यथा, मनुः। ८।१९९।
"अस्वामिना कृतो यस्तु दायो विक्रय एव वा।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः॥")
खण्डनम्। (दो छेदे+घञ्।) खण्डनम्। इति शब्दरत्नावली॥ लयः। इत्यजयपालः॥ (ददातीति। दा+"श्याद्व्यधेति।" ३।१।१४१। इति णः। दातरि, त्रि। इति व्याकरणम्॥)

दायकः, त्रि, (ददातीति। दा+ण्वुल्।) दाता। यथा। हतारिगतिदायक इति भक्तिरसामृतसिन्धुः॥ (यथाच महाभारते। ३।१९३।३३।
"तावतां गोसहस्राणां फलं प्राप्नोति दायकः॥")

दायबन्धुः, पुं, (दाये बन्धुः।) भ्राता। इति शब्दरत्नावली॥

दायभागः, पुं, (दायस्य भागः।) सम्बन्धिमात्रेण सम्बन्धिधनविभागः। पूर्व्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दस्तस्य विभागः। एकदेशगतस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया व्यवस्थितस्य गुटिकापातादिना व्यञ्जनम्। अथवा विशेषेण भजनं स्वत्वज्ञापनं वा। यत्र चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते॥*॥ अथ दायाधिकारक्रमे पुंधनाधिकारिणः। तत्रादौ मृतधने औरसपुत्त्रस्याधिकारः। तदभावे पौत्त्रस्य। तदभावे प्रपौत्त्रस्य। मृतपितृकपौत्त्रमृतपितामहकप्रपौत्त्रयोः पुत्त्रेण सह तुल्याधिकारः। एषामभावे पत्नी धनाधिकारिणी। तत्रायं विशेषः पत्नी धनं भुञ्जीत